- Title – विवाह पद्धतीटीका –
- Accession No – Title –
- Accession No –
- Folio No/ Pages – 37 / 74
- Lines-
- Size
- Substance Paper –
- Script Devanagari = देवनागरिक
- Language – संस्कृत
- Period –
- Beginning – ॐ गं गणपतये नमः. ॐ त्र्यहत्वो भवंनि प्पयुराणा. –
- End – ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत्
- Colophon-
- Illustrations -
- Source -
- Subject - कर्मकाण्ड
- Revisor -
- Author -
- Remarks- – पूर्ण – 1-37 पृष्ठ अंकित

वि
प
टी·
२

ॐ गणपतये नमः ॐ षडर्घ्या भवंति षट्पुरुषाः अर्घ्या अर्घार्हा भवंतीति शेषः के ते आचार्यऋ
त्विग्वैवाह्यो राजा प्रियः स्नातकश्चेति आचार्य उपनयनपूर्वकं वेदाध्यापकः ऋत्विक्
श्रौतस्मार्ताग्निकर्मार्थं वृतो ब्रह्मादिः वैवाह्यो वरः राजाभिषेकादिगुणवान् प्रजापा
लनेऽधिकृतः क्षत्रियः प्रियः उत्कृष्टजातिः समानजातिर्वा सख्या स्नातकः ब्रह्मचर्या
त्समावृत्तः आचार्य्यसार्थः नान्यस्नातकस्य च मनुः तं प्रतीतं स्वधर्मेण ब्रह्मदायहरं
वि४ पितुः स्रग्विणं तल्प आसीनमर्हयेत्प्रथमं गवेति ब्रह्मवेदस्तमेव दायं तं हरतीति ब्रह्म
दायहरः इत्येते अतिसंवत्सरागतानर्हयेयुः प्रतिसंवत्सरमागतान् आचार्यादीन् २
आचार्यं न पूजयेयुः नार्वाक् पदत्यमाणस्तु विज्ञः पद्यमानः पञ्चकरिष्यन्तः यज
मानाः ऋत्विजः याजकान् ब्रह्मादीन् तु पुनः अर्हयेयुरित्यनुषंगः न प्रतिसंवत्सरमिति
पमः कथमर्हयेयुरित्यपेक्षायामाह आसनमाहार्याह साधुभवानास्तामर्चयिष्या
मो भवंतमिति आसनं वरुणादिदारुमयं पीठादि अर्द्धार्थ्यमनुचरो रानार्थ्य आहब्रवी
ति अर्च्चकः किमिति एवं भवान् पूज्यः साधुस्त्वयायाभवति तथास्त्वास्तानिषद्य
अर्च्चयिष्यामः पूजयिष्यामो भवंतं अर्च्चनीयं यावत् अर्च्चयिष्याम पूजयिष्या
मो भवंतं अर्च्चनीयं यावत् अर्च्चयिष्याम इति बहुवचनं भार्यापुत्रादिः सर्वगृ
ह्यापेक्षं अथ प्रावश्यकृतिः यत्र वाग्रे ऋत्विङ्नागगच्छति सर्वगृह्याद्वचनेनत्र चापति
ष्ठति आहरंति विष्टरं पाद्यं पादार्थमुदकम् अर्घमाचमनीयं मधुपर्कं दधि
मधु घृतमपिहितं कांस्यं कांस्येन आहरंतीत्यानयंति यजमानपुरुषाः विष्टरादि
मधुपर्कपर्यंतान् दर्शितोपकरणानि तत्र विष्टरं पंचविंशतिदर्भनिर्मितमयं कूर्च्चं
वेण्याकारं वा पाद्यं पञ्चाङ्गमानमशीयं उदकं लेवाणं द्वितीयं विष्टरपादार्घमुदकं २

2

1—37

पादप्रक्षालनार्थं तोयादिपात्रस्थं जलं मृण्मयपात्रसंस्थमुदकं अर्घं गंधपुष्पाक्ष
तकुशतिलसर्षपदूर्वान्वितं स्वर्णादिपात्रस्थमुदकं आचमनीयं आचम
नार्थं कमंडलुसंभृतं जलं मधुपर्कं दधिमधुघृतं कांस्यपात्रे कृतं अपरेणार्घं कां
स्यपात्रेणाच्छादितं अन्यानि त्रीणि प्राग्विष्टरादीनि अन्यः अर्च्चकादपरः वि
ष्टरो विष्टरो विष्टरः इत्येवमेकैकं त्रिस्त्रिः त्रीन्त्रीन्वारान्ब्रूयात् विष्टरप्रभृती
न् पाद्यपाद्यार्घोदकार्घाचमनीयमधुपर्कान् विष्टरं प्रतिगृह्णाति अन्यस्मादुखे
न यजमानेन तिष्ठता दत्तं स्वासनात्पश्चिमे प्राङ्मुखे विस्तृतं अग्र्यः पूर्वोक्तल
क्षणं विष्टरं तं पाणिभ्यामुदगग्रमादत्ते वर्ष्मोस्मीति मंत्रान्ते ॐ वर्ष्मोस्मि
समानानामुद्यतामिव सूर्यः इमं तमभितिष्ठामि यो मा कश्चाभिदासति
इति अस्यार्थः अहं समानानां समानजातीनां वर्ष्मोस्मि आच्छादको भ
वामि अथ केषां कमिव उद्यतां उदयशालिनां चंद्रतारकाणां सूर्य इव किं
च यः कश्चित् मां मामभिदासति हिनस्ति अभिपूर्वोदासतिः हिंसार्थः इति
कर्केण व्याख्यानं तमिमं विष्टरं तूपनापन्नं अभितिष्ठामि उदयमासनेनाभि ॥ अभिमृश्याथः कृत्वाविष्टा प्रि॰
धायाभ्युपविशति पादयोरन्यं विष्टरं आसीनाय विष्टरं आसीनायान्यं विष्ट
रं यजमानः पूर्ववद्ददाति स च तं पूर्ववत्प्रतिगृह्य प्रक्षालितयोः पादयोरध
स्तात् वर्ष्मोस्मीत्यनेन मंत्रेण निदधाति सव्यं पादं प्रक्षाल्य दक्षिणं प्रक्षा
लयति ब्राह्मणश्चेद्दक्षिणं प्रथमं ततोन्येन पाद्यमिति त्रिरुक्ते पात्रस्थितय
जमानार्पितं पाद्योदकमादाय यामन् चरणं प्रक्षाल्य दक्षिणं प्रक्षालयति दो

ग्ता॥

वि॰ प॰ टी॰ २

त्रियादिरर्घ्यमेतत् यद्विबह्वरोऽर्घ्यः स्यात्तदा प्रथमे दर्हिरणं पत्ता त्युपवीत प्रक्षाल ५
यति विराजो दोहोसीत्यनेन मंत्रेण विराजो दोहोसि विराजो दोहमशीय मयि
पाद्यायै विराजो दोहः हे ननत्वं विराजो वसि पाद्या दीर्घदोहः प्रभूतपणं त्वं सि त्व
हं विराजो दोहं विशिष्टदीप्तिं दोहं प्रपूरकं त्वा प्रतीय एकामि विराजो विशि
ष्टदीप्तदोहः प्रपूरकस्त्वं मयि पाद्यायै मम पाद्याय भव। विराजो दोहोसीति त
लमभिमंत्र्य त्वामभिगृह्णामि हननेन मम पाद्य स्व विशिष्टदीप्तिं कुरु इति वा
क्यार्थः पद्यायेति अर्थागतिर्ही प्रादानेषु इत्य संधानो अपि पिबिलिङ्‌ उ
तमपुष्पेकवचने रूपमशीय मयि इति षष्ठ्यर्थे सप्तमी पाद्यायै लिंगव्यत्य
येन स्त्रीत्वं अर्घं प्रतिगृह्णाति नतोऽर्घ इत्यनेन त्रिह्रियमाणं दनम
र्घमापस्थपुष्पाभिः सर्वान्कामानवाप्नुवानि इत्यापः यतः कारणा
त् यूयं आपः आप्नुवंतीत्यापस्थ भवथ अतोऽहं युष्माभिर्गृहीताभिः स
र्वान्कामानन्यवाप्नुवानि प्राप्नुयामीति वाक्यार्थः समुद्रं वः [illegible] त्वावि
न्यसंधानं आप्नुवंतीत्यापस्मिन्नर्थे आप्नोतीति [illegible] पिक्वते [illegible] चकते
त्यपरा चैव सिद्धं प्रथमाबहुवचनं रूपं निनयन्नभिमंत्रयेदिति समुद्रं वः इति
प्रतिगृहीतमर्घं शिरसाभिवंद्य निनयन् भूमौ प्रवाहयन् अभिमंत्रयते स
मुद्रं व इति मंत्रेण ॐ समुद्रं वः प्रहिणोमि स्वां योनिमभिगच्छत अरिष्टा
स्माकं वीरा मा परासेचि मत्पयः इत्यापः वो युष्मान् समुद्रं प्रहिणोमि
प्रस्थापयामि मया प्रहिता यूयं स्वां योनिं स्वकीयोत्पत्तिस्थानं समुद्रमभिग २

5

इति अरिष्टा अस्माकं वीतयतामिति किंभूता यूयं अरिष्टा अहिंसका पुनः किंभूता वीराः
उत्कृष्टाः किंच मन्त्रयः महोपपातनयोग्यवत्य्यः तत्तायासीति मागच्छत्वितेन तद्दि
देवनिष्णुत्पमभिप्रायः हे आपः यतस्त्वः महोपपातनयोग्यतत्त्व मयानप्रहितेन ईदृवाति
ष्टत्र अतोऽत्रन्या आपः तमेव समुद्रं प्रहिता अस्माकं अहिंसका भूत्वा समुद्रं गच्छ
त्विति वाक्यार्थः अथार्घप्रमाणमाह वशिष्ठः कुशाचंदनपुष्पाणि दुर्वाक्षतफ
लानि च पयो दधि समायुक्तं अर्घांगसमर्घमुच्यते निवेदितमाचमनीयं च गृ
हीत्वा अमागन्यशसेति मंत्रेणोत्पाचम्य अथाचमनीयप्रमाणमाह व्यासः अं
गुष्ठतर्जनीमूलसंमी स्वरे त्वयोर्द्वयोः करमध्ये जलस्याप्प एवमाचमनमाह
मा४ देत् आचमाग त्रिति नतः आचमनीयमिति त्रिस्पेनोक्ते यजमानदत्तमाच
मनीयं प्रतिगृह्य आमागन्यशसेति अनेन मंत्रेणाचमिति ओं अमागन्यशसासंर
सृजवर्चसा तं मा कुरु प्रियं प्रजानामधिपतिं पशूनामरिष्टं तनूनां रेजल
यशास्वमामाग्मागन् आगमय यशस्विनं मा कुरु तयाममा वर्चसा तेजसा त
सृष्टतेजस्विनं कुरु न या सा प्रजानां प्रियं कुरु पशूनामधिपतिं ईश्वरं कुरु
८४ तनूनां देहावयवानां अरिष्टं अपरिहितं कुर्वीत्यनेनैव संबंधः हे जलेन्य
नेन आचमनेन मयि यशस्वीत्वं तेजस्वीत्वं लोकप्रियत्वं गवादि मत्वा पदृरि
नेदेवतानि [illegible] कुर्वंतित्याशंसा वाक्यार्थः तत्रागान्ननिधानोरूतभावि
तरूपतत्राह पूर्वेकृतेनस्फलात् मध्यमपुरुषैकवचनं अवकुलं छांदसीति
बहुवचनात् प्रायोलक्याच्छंदसीति विकल्पेन विधानात् सर्दिरादेशो

वि प टी २

नभवति इत्यत्रैनीकारलोपः मोनोधानोतीति मकारस्य नकारः तत्कृताचमनानंतरं स्वा
चैमाचमनं कृत्वा मित्रस्यत्वेति मधुपर्कं प्रतिनिरीक्षेत ॐ मित्रस्यत्वेति मधुपर्कं
प्रतीक्षते मित्रस्यत्वा चक्षुषा प्रतीक्षे हे मधुपर्क त्वां त्वां मित्रस्यादित्यस्य चक्षुषा
प्रतीक्षे पश्यामि सूर्यस्यादित्यस्य चक्षुषा येनानुगृहीतस्त्वां मधुपर्कं पश्यामीति वा
क्यार्थः ततो मधुपर्कं प्रतिनिरीक्ष्य तं नोके यजमानहस्तगतं गृहीत्वा मधुपर्कं दे
वस्यत्वेति मंत्रेण यजमानदत्तं मधुपर्कं दक्षिणहस्तेन प्रतिगृह्णाति ॐ देवस्यत्वा
सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामि हे मधुपर्क त्वा
त्वां प्रतिगृह्णामि कस्मिन्सति देवस्य सवितुः आदित्यस्य प्रसवे अभ्यनुज्ञा
ने सति संपन्नायेति याचनं पूर्वं स्तुवन्ति अभ्यनुज्ञानं वर्णनेऽस्तुयते यस्माद्वि स्तुत्य
गृहणेकेन अश्विनोः अश्विनीकुमारयोर्बाहुभ्यां नयाहृस्य आदित्यस्य हस्
ताभ्यां तेरभ्यनुगृहीतेनानुगृहीतोऽहं त्वां मधुपर्कं गृह्णामीति वाक्यार्थः सव्ये पाणि
णौ कृत्वा दक्षिणस्यानामिकया त्रिः प्रयौति नमः श्यावास्यायेति तं मधुपर्कं वा
महस्ते कृत्वा दक्षिणस्य पाणेः अनामिकांगुल्या त्रिवारमालोडयति नमः श्या
वास्येति मंत्रेण ॐ नमः श्यावास्यायान्नशने यत्त आविद्धं तत्ते निकृंतामि इ
ति अत्र नमः श्यावेन मधुपर्को विवक्षितः तेन फेन नमस्य नमस्कारात् श्या
वाश्यायानि त्वामित्यध्याहार्यं त्वां आमि प्रसारयामि नमस्येति स्तुतिपूर्वकं
सर्वोधात्वानि अन्न यामि तवोपदेन स्फोटयामि इति वाक्यार्थः अत्रावाश्या
यान्नोनिपेयत् गताविन्यस्य धातोः छांदसत्वेन परस्मैपदं भवति अत्र पूर्वे

मिश्रयाभीत्यर्थः किं तेन त्वत्प्राशिते भोजने यत्त आविद्धं २
उपहतं तत्तेन तव निकृंतामि १२

7

आङ्पूर्वे कृते सोपसर्गत्वात् निमग्नणार्थे वर्णागमदृत्वादेरकारेशाकारः ल्लोट् उत्तं मधु
ह षैकवचनेरूपं अनामिकांगुष्ठेनकाग्नीर्णिहरत्यति अनामिका च अंगुष्ठश्च अ
नामिकांगुष्ठौ तेन अनामिकांगुष्ठेन त्रिवारं निरुक्षयति पात्राद्बहिर्निर्गमयति चकारा
त् प्रतिमंत्रं यत् निरुक्षणं तस्य त्रिः प्राश्नाति यन्मधुनो मधव्यमिति तस्य मधुप
र्कस्यैकदेशमादाय यन्मधुनो मधव्यमित्यादिना मंत्रेण सकृत्प्राश्य पुनः अनेने
व मंत्रेण उच्छिष्टं एवं द्वितीयं प्राश्य तथैव तृतीयं प्राश्नामि उत्तं यन्मधुनो मधव्यं
परमं रूपमन्नाद्यं तेनाहं मधुनो मधव्येन परमेण रूपेणान्नाद्येन परमो मधव्योन्ना
दोऽसानि मधुनो मधुपर्कस्य यद्रूपं किंभूतं मधव्यं मधुरं पुनः किंभूतं परमं उत्कृष्टं पु
नश्च किंभूतं अन्नाद्यं यथान्नाद्यस्य पुष्टकबलादिकमादधाति तथैव तद्रूपं तत्सर्वं
तेन मधव्येन परमेण रूपेणान्नाद्येन अत्र सर्वत्र तृतीयार्थे तृतीया तथा च
सत्येवं योज्यं तन्मधुनो मधव्यं परमं अन्नाद्यं रूपं मद्रूपं अश्नानि भक्षयामि म
धव्यमित्यादि पुनः पदविशेषणानि तत्र आदरातिशयद्योतनार्थं किंभूतोऽहं पर
मः उत्तमः मधव्यः मधुरशीलः अन्नादः अन्नमत्तीत्यन्नादः मधुनः स्वरूपमु
त्कृष्टं मधुरं बलाधायकमित्युक्तौ तं तदेवंभूतं मद्रूपं उत्कर्षायमधुरशील
अन्नाद त्वाय त्वाय च भक्षयामीत्यादि प्राणावाक्यार्थः मधुमतीभिर्वा प्रत्यृचं मधुवाता इति
तिसृभिः ऋग्भिः प्रत्यृचं प्रतिमंत्रं वा पूर्ववत् त्रिः प्राश्नाति पुत्रायान्तेवासिने चोत्त
रतः आसीनायोच्छिष्टं दद्यात् सर्वं वा प्राश्नीयात् प्राग्वा असंचरे निनयेत् मधुपर्कस्य
शेषं प्रतिग्रहीता पुत्राय स्वतनयाय अन्तेवासिने उपनयनप्रभृति विद्यार्थिने

वि
प
प
८

8

आचार्याः कुलवासिने शिष्याय वा कन्यंभूताय उत्तरतन्त्रासीनाय उच्छ्रिष्टमाशिनयोर्वं मधुपर्कं प्रयच्छेत
अथवा सर्वं भक्षयेत् यद्वा प्राक् पूर्वं संचिन्त्य गतं चेव जनन संचार वर्जिते देशे त्यजेत अत्र पूर्वं पूर्वासंभवे
उत्तरोत्तरां शक्तिपत्निकुर्यात् अथ मधुपर्कं प्रमाणमाह व्यासः यज्ञे विवाहे च तथारदोषु निरवसेत्स
तृतीयविवाहे च मधुपर्कं प्रकाशितं मधुपर्कोनुयाक न्यायाणि गृह्णु पुरगल्ली लाजाहामे वधू प्रोक्ता
पत्न्याश्च नुर्यो कर्मणि मधुपर्कं निमित्तं कांस्यपात्रे चु स्त्रुत अन्येषां चेव धातूनां हीनपात्रेषु
वर्जयेत् कृतेयुगे स्वर्णपात्रं स्वर्णपात्रे भवे द्विजाः रौप्यपात्रेषु क्षत्रियः ताम्रपात्रे भवेद्वैश्यः लोहपात्रे
शूद्रस्य त्रेतायां रौप्यमेव च द्वापरे अपुके पात्रे कलियुगे लोहमेव च स्वर्णपात्रे भवे द्विप रौप्यपात्रेषु
क्षत्रियः ताम्रपात्रे भवेद्वैश्यः लोहपात्रेषु क्षत्रियः शूद्रस्य स्वर्णपात्रे भवे लक्ष्मी रौप्यपात्रे धनागता ताम्र
पात्रे मतिः शूरः लोहपात्रे मतिनाश कपिला कृष्ण धूम्रा च श्वेता च पाटलीनया एतासां दधि दुग्धं च दद्या
पयेत् प्रसन्नपात्रके गोदुग्धं शुचिभिर्नित्यं तत्त्वथा सर्पिषा गवां लोहृशुद्धिः क्षिपेन्मध्ये मधुपर्के स्मृतो
बुधैः गवां दुग्धं च रोमाणि घृतं मध्यनु मक्षिका कृमिकीटयुतः दोषः मधुपर्के निषिध्यते फलमाह
रोमयुक्तं भवेत्कुष्ठं समक्षिकं दरिद्रता कृमिकीटं भवेन्नवंध्या मधुपर्केत्यजेद्बुधः यन्याएवालके हे
ड्योवने च च रोतिस्मः तस्स्वेनासंचेन्यापमधुपर्कं प्रकाशितं गंगादकं यापीत्वा मधुपर्कं तथापकः
तस्मान्नरसहस्रेणकामधेनुशतानि च मधुपर्कं प्रमाणमाह महेश्वरः सहृनेत्रोडस्यपुक्तं अन्त्यहमिदं
दधिः प्रजापतेः वरं लब्धा प्राशनं व्यासुरेतवे मार्कण्डेयः प्राशनं मधुपर्कस्य यून त्वहं करोति च बालयाव
नवृद्धेषु कृत्वापापव्यापोहति पराशर आह विवाहसमये भक्षं मधुपर्कं हिमजलिः आयुरारोग्यमैश्वर
र्यं लभते कामपुष्कलान् अयसगृह्य मधुपर्कं प्रमाणमाह च्यवनः पलपंच घृतं प्रोक्तं द्विपलंम
धुकृच्यते दधिपलपंच दशमधुपर्कं विधिस्मृत हे वस्मन्तोडत्य जेल्लिमार्ग हीत्वा सव्यपाणौ कृत्वा
ओं नमस्यावासायामितित्रिः आलोड्य भूमौ वमवस्वाणाय त्रेणानिःक्षिप्यः यन्मधुनामधव्यमिति
मंत्रेणत्रिः प्राश्नीयात् सर्वं वाशेषमसंचरदेशे त्यजेत आचम्य प्राणान्संस्पृशति वाङ्गेश्वा
स्यानि मंत्रेण ओंवाङ्मआस्येनसोः प्राणो अक्ष्णो मस्तुः कर्णयोश्रोत्रं वक्रो बलं नृवोरोजोरिष्टा
निमेंगानि तनूस्त्वामे सहसन्तु मेमम आस्यमृथेवन मस्तु मेमनसोः नासिकयोः प्राणः प्रा
णावायुरस्तु मेमम अक्ष्णोर्गोलकयोश्चक्षुरिंद्रियमस्तु मेमम कर्णशष्कुल्योः श्रोत्र । मिंदि ८

यमस्तु मे मम वाङ्मुखे बलं समर्थमस्तु मे मम ऊर्वोः ऊजः पटुत्वमस्तु मे मम अंगानि शिरः प्रभृतीनि अरिष्टानि अपद्रि
तानि संतु मे मम तनूर्देहावयवाः शरीरावयवाः सन्निति संबंधः कया सह तन्वा शरीरेण सह हेत्वर्थः अनेनाचमना
नेन तत्कृतेनेन्द्रियस्पर्शेन मम मुखाद्यवयवेषु वचनादिशक्तिर्भवतु आपस्त्वन्यनाचममभ्यगति इत्याशंसा वाक्या
र्थः आचान्तोदकाय शास्त्रमादाय गौरिति त्रिः प्राह प्रत्याह आचान्तमुदकं येन तस्मै आचान्तमुदकाय तस्मै आचान्तोद
काय अर्घ्याय आदाय शास्त्रं स्वहस्ते गृहीत्वा यजमानः गौर्गौर्गौः आलभतामिति प्राह ब्रवीति ततोऽर्घ्यः प्रत्याह माता
रुद्राणामिति ॐ माता रुद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः प्रणु वोचं चिकितुषे जनाय मा
गामनागामदितिं वधिष्ट मम चामुष्य च पाप्मा हत ॐ उत्सृजत तृणान्यत्त्विति प्रथमं उत्तरार्धं योन्यते अतो रुद्र
णां कारस्य मतत्वात् प्रवाचे पुनः पुनः उक्तवानित्यर्थः अतस्य आमाहुः योगे पञ्चमीत्यादिना निषेधः अविशिष्टजनो
पार्दनेन कस्मै चित्प्राणमात्रायेत्यर्थः यस्य मयण इच्छा नास्ति तस्मै इदमभिधानं रौगायुक्ता चित्ताशक्यजनाय
तस्य विशेषणं चिकितुषे जिज्ञासवे गुरूपदेशं इत्यादि यावत् किं वदसीत्याकांक्षायामाह गामा वधिष्ट मा मारय किं
भूतां गां अनपराधां पुनः किंभूतां अदितिं दितिः खण्डनं दितिस्तस्या अयस्यानास्तीति अदिति तां पुनः किं स्वतायां गौः
रुद्राणां माता वसूनां दुहिता [illegible] आदित्यानां स्वसा अमृतस्य देवानामाहारभूतस्य घृतस्य नाभि उत्प
त्तिस्थानं एतादृशी सर्वथा हिंसेति भाव किंच मम च अमुष्य च अमुकनाम्नः पाप्मानं हनत नाशयतु
हंतु मिति स्वीकारे ॐ मिति निमन्त्रणवचनमनु मन्त्र उत्सृजत गामदवनात्सेचेत्यर्थः अनुवोचमित्यत्रानुशा
स्त्रे उत्सृजेत्यत्रानुशब्दो उत्सृजेत्यत्रान्वे निश्चात्समयात् दकारलोपः तदनु तृणान्यत्तु मुक्ता सती तृणानि खाद
तु गौ मुक्तासतीति मन्त्रे इति तात्पर्ये माता रुद्राणामित्यादिना गां सन्नामवधिष्टेति निषिद्धा हिंसा यस्या हेतु क
तु अयं पापं हत यज्ञाम् उत्सृजत गां अमुक्ता सती तृणानि भक्षयेदिति इत्याशंक्याकांक्षायां नत्वेवामांसोऽर्घः स्यात् नु
शब्दः पदव्याहृतोऽर्घः अमांसः पश्वालंभवर्जितो नैव भवेत् अत्र पश्वालभनं यद्यपि सत्त्वेऽदित्यनेन सूत्रे
ण गवालभनस्य विकल्पं विधाय नत्वेवामांसोऽर्घः स्यादित्यनेन गवालभनं अर्घे पाक्षे नियमेन विधत्ते तथा
पीतहव्यः स्मृत्यन्तरविरोधेन अप्रमाण्ये व्यवस्थामाह अधियज्ञमधिविवाहं कुर्वीतेत्येवं ब्रूयात् अधिविवा
हं विवाहे कुर्वीतेति विधानात् गवालभनं पाप्मानं हत नो मीत्यपसानं इत्येवं वदेत् अन्यत्र पापा हत पाप्मानं
नो मीतीति वा विकल्पः यद्यप्येवं मधुपर्के गवालंभनं आचार्यैर्णोक्तं तथापि अस्वर्ग्यत्वे लोकविद्विष्टत्वा
च्च लोकविधेयः अस्वर्ग्यं लोकविद्विष्टं धर्ममप्याचरेन्नत्विति याज्ञवल्क्यादिस्मृतिषु निषेधदर्शनात्
यद्यप्यसकृत्संवत्सरस्य सकृत्तु पुनः पुनः सोमेनयजेतेति सोमयागादिना यजेत् तदापि एनं सोमयाजिनं कृतार्घ्यं
यंते कृतार्घ्या एवं संतः याजयेयुः यज्ञकारयेयुः न कृतार्घ्या याजयेयुरिति श्रुतिवचनात् सोमेन यक्ष्यते
त्यनेन सोमयागार्थमेव वृत्ता ऋत्विजः अर्घ्या इति गम्यते तेन यागान्तरार्थं च चत्वारः पाकयज्ञोपचाने ॐ अयमने ॐ

वि
प
टी
५

10

दैनादिकमस्मिन् [illegible] ह्यग्निस्तस्मिन् पाकयज्ञाः पंच वैवाहिकेग्नौ कुर्वीत कुर्वीत गार्ह्यं कर्म यथाविधिः पंच
यज्ञविधानं च पंक्तिं चान्वाहिकीं गृहीति मनुस्मार्ते न [illegible] तेन चत्वारः चतुर्विधा भवन्ति कथं हुतो
हुतः प्रहुतः प्राशितमात्रे न [illegible] हुतः होममात्रं यथा [illegible] होमः प्रहुतः होमबलिहरणं कर्म यथा [illegible] दारो
हरणं प्रहुतो यत्र होमो बलिकर्म बलिहरणं च यथा [illegible] आदिकर्म प्राशितं यत्र प्राशनमात्रं न होमो न बलिः यथा स
[illegible] पायसः अयपला नेतरं ब्राह्मणभोजनमित्यं चतुर्विधाः पंच महायज्ञाः शालायां विवाहचूडाकर
ण उपनयने केशान्ते सीमन्तोन्नयने पंचसु संस्कारकर्मसु [illegible] शालायां गृहं [illegible] शालाग्निः [illegible]
नितावन्न तस्यां कर्म भवति यथा विवाहे पत्नीनयने चूडाकरणे होरकर्माणि उपनयने [illegible] केशान्ते
गोदानकर्माणि सीमन्तोन्नयने गर्भसंस्कारे अन्य [illegible] शालायामेव उपलिप्त उद्धृताभ्युक्षिते
मा ५ अग्निमुपसमाधाय उपलिप्ते गोमयादकेन उद्धृते [illegible] रेखाभिः अभ्युक्षिते उदकेनाभ्युक्षि
ते वह्निः शालागृह्यः अन्यस्मिन् प्रदेशे [illegible] अग्निमुपसमाधाय अग्निलौकिककर्मावसथ्यो वा उपसमाधाय स्था
पयित्वा निर्मथ्य एके विवाहे वेदिकायाः प्रथमं [illegible] वेदीप्रमाणमाह [illegible] नराम्नानुगुणनारी [illegible]
वलेन च वेदिका [illegible] उभयोवरहोमवत् अथ कोनुकागारवेदीप्रमाणादिकं मानमाह पराश
रः [illegible] स्वभावः [illegible] अथ वेदी
दिग्प्रमाणमाह कात्यायनः [illegible] स्वभाव [illegible]
वरकन्ययोः एके आचार्या विवाहपाणिग्रहे निर्मथ्यमारण्यमग्निं वैवाहिकहोमाधिकरणमिच्छन्ति ये
[illegible] विवाहार्थं कर्म आह उदगयन आपूर्यमाणपक्षे पुण्याहे कुमार्याः पाणिं गृह्णीयात् उदगयने मृगा
दिराशिषट्कस्थिते रवौ आपूर्यमाणपक्षे शुक्लपक्षे पुण्याहे ज्योतिःशास्त्रोक्त विष्ट्यादिदोषरहिते कुमा
र्याः अनन्यपूर्विकायाः [illegible] पुनर्विवाहस्यानियमः इच्छा चेत्क
रोति पाणिं गृह्णीयात् पाणिग्रहणं गृह्योक्तविधिना गृह्णीयात् अस्मिन्नयनपक्षदिनानियमः नक्षत्र
नियममाह त्रिषु त्रिषु उत्तरादिषु स्वातौ मृगशिरसि रोहिण्यां वा [illegible] उत्तरादीनि तेषु क
त्रिषु त्रिषु [illegible] उत्तरा [illegible] इति त्रीणि तथा उत्तरारेवत्यश्वि
न्यश्च इति त्रीणि स्वातौ मृगशिरसि रोहिण्यां वा एतेषां नक्षत्राणामन्यतमे [illegible] कुमार्याः पाणिं गृह्णीया
त् इति सामान्येनोक्तमधुना विशेषमाह तिस्रो ब्राह्मणस्य वर्णानुपूर्व्येण द्वे राजन्यस्य एका वैश्यस्य ब्राह्मण
स्य द्विजा [illegible] वर्णानुपूर्व्येण वर्णक्रमेण तिस्रः ब्राह्मणी क्षत्रिया वैश्या विवाह्या भवन्ति द्वे क्षत्रियावैश्ये
राजन्यस्य विवाह्ये भवतः एका वैश्या वैश्यस्य विवाह्या भवति वर्णानुपूर्व्यग्रहणात् [illegible]
सर्वेषां शूद्रामप्येके मन्त्रवर्जं सर्वेषां ब्राह्मणक्षत्रियवैश्यानां शूद्रामप्येके विवाह्यामन्यन्ते तत्र विशेषः ५

मंत्रवर्ज्जं मंत्ररहितं पत्नीभवतितथा अत्रद्विजातीनां शूद्रापरिणयने मंत्रवत्क्रियानास्ति किंतुमंत्ररहि
तक्रियामात्रमितिगम्यते ननस्य शूद्रस्य शूद्रापरिणयने पन्नमन्त्रवत्होमादिकर्म्मकुर्वीत नत्वशास्त्रीयं एकेन
मन्यंते अत्र शूद्रविवाहकृतः शूद्राणांधर्म्मकार्यत्वेति निरुक्तकार्यैस्थितिवचनात् अतोस्मरणीय शूद्रापरि
णयनं पक्षे एवं सतिपूर्वस्मा समाप्ती तासवनस्पतिरहितवाननंतरं गशिच्छित्वा प्रथमंतरामामुपयादेतेतिनिबंधः
उपपद्यते नगाग्नेर्हिशतिद्विधस्यविशेषयः यदिरामोदानेस्थाने नदात्सिद्धिचिनः कथंतत् प्रथमगमनप्रति
विधानेन तस्माच्छूद्रापरिणयनं भोगार्थेच्छयाकुर्वतेनानपाश्यानिक्रमः धर्म्म प्रजानन्यार्थाद्दितिवाह
शास्त्रीक्रममभिधाय इदानीं प्रकृतमाह अथैनां वाससा परिधापयति अथ अग्न्यस्थापनानंतरं एतां
कुमारींवासः वस्त्रं परिधापयति परिहितं कारयति किंभूतं वस्त्रं अहतं पुनः किंभूतेन त्वं हेमा कु
मारी च स्वयं परिधेनयत् जरांगच्छनिमंत्रपठित्वा ॐ जरांगच्छपरिधत्स्ववासो भवाकृष्टीनामभि
शस्तिपा चाभूतंच शतं च जीवेमशरदः सुवर्च्चारयिं च पुत्राननुसंव्ययस्वायुष्मतीदं परिधत्स्ववासः
हे आयुष्मति कन्ये जरां गच्छवृद्धत्वयाहि चिरंजीविनी भवेत्यर्थः किंच वासः परिधत्स्ववस्त्रं परिधारय व
स्त्रविस्तृतामाकदाचिदपि भवेत्यर्थः किंच आकृष्टीनाभव आकृष्टीनामतिप्रथमायाषष्ठीत
नाकृष्टीमनोहरा भवेत्यर्थः किंच आकृष्टीनां अभिशस्तिपावा अभिशस्तिशाय तंतत्रवा
पवित्रामनोहरं मतीशयनेपवित्राभवेत्यर्थः किंचशतंशरदः जीव किंभूता सुवर्च्चाः शोभनदी
प्तियुक्तापानं वर्षाणिजीवेत्यर्थः किंचरयिंधनं अनुसंव्ययस्व संहृत्यधारयेत्यर्थः न केवलं धनं
किंतुपुत्रान् अनुसंहृत्य एतेन मयास्तगोपिता नं त्वा प्रयेइदंवस्त्रं परिधत्स्व चिरंजीवित्वार्थं आ
यामनोहरार्थं धनार्थं पुत्रत्वार्थं च इदं वासः परिधत्स्वेति वाक्यार्थः तत्रानुसंव्ययस्वेति अत्र
वरणेऽन्यस्य धातोः स्वसंपूर्वकृतेनयोक्तेतिसिद्धिरूपं अथोत्तरीयं अथ अनंतरीयपरिधानानंतरं उत्तरीय
वासः परिधापयति याअकृंतन्निति मंत्रेण ॐ या अकृंतन्नवयन् या अतन्वत याश्च देवीस्तंतूनभि
तो ततंथ तास्त्वा देवीर्जरसे संव्ययन्त्वायुष्मतीदं परिधत्स्व वासः अस्यायुष्मतिनयादेवीर्दिव्य
स्तन्तून् [illegible] अकृंतन् कर्तितवत्यः तयायास्तन्तून् अवयन् धृतवत्यः ताः देव्यः त्वां संव्यय
स्व संव्ययन्तु परिधापयंत्वित्यर्थः तथा च याः तितविसिद्धवासः ततं विस्तारय कथंकारं अभितः उ
भयतः अस्तादेतदैर्घ्येण च पुस्तारयपरिधत्स्व किमर्थं जरसे वृद्धत्वार्थं चिरंजीवित्वार्थमितियावत्
याभिर्देवीभिः सूत्रस्य निष्पादिनाद्दासत्वं संनिष्पादितं ताभिः परिधापितं मतन् इदमुत्तरीयवस्त्रं
विस्तार्य परिधत्स्वेति वाक्यार्थः अवयन्निति वो तंतुसंतानेऽन्यस्य रूपं देवीभिर्निष्पादितं

वि
प
टी
६

ति प्रथमा बहुवचने रूपं अनन्तेति ननु विभक्तौ रित्यस्य मध्यमपुरुषैकवचने बहुलं छन्दसीति अमाङ्योगेपी
त्यडागमः तेन धेति ननु विरुद्धस्त्रापलिटि रूपं संप्रयुक्ते यत्रतिन इत्यमिति भवतीति प्रथमपुरुषबहुवचने
मध्यमपुरुषैकवचनं अत्र परिधापयेति इति लिङ्गेन स्वकारितार्थत्वात् परिधत्स्व वास इति मंत्रस्या
पि नातदर्थत्वात् परिधापयितान्यः इत्यवगम्यते स किंवर अध्वर्युर्वा इति संशयः तत्राध्वर्युः क
र्मसु वेदयोगादि परिभाषा चालादध्वर्युः परिधापयितेति चेन्न तस्मात्तेषु कर्मसु अध्वर्योः केन
योगाभावात् समाख्यया हि अध्वर्योः कर्मत्वयोगः समाख्यानवेदयोगात् न च स्मृतिर्वेदस्म
रणाद्वेदमूलत्वं प्रमाणत्वात् न पुनर्वेदमूलत्वेन अतः समाख्याया अभावात् स्वयंकर्तृत्वेपा
कयज्ञेषु अनेनाववरएव परिधापयितानन्तु पूर्णपात्रं दक्षिणा वरो वेति पाकयज्ञेषु परिक्रयार्था दक्षिणा
श्रूयते सा दक्षिणा परिक्रयत्वाभावेनोपपद्यते अनन्तरं न यथा उपपत्त्या अन्यस्य कर्तृत्वं कल्प्यते नैत
देव अन्यस्य ब्राह्मणः कर्तृ विद्यमानत्वात् परिक्रयार्था दक्षिणा अत्र एवासोपपन्नं किं च वचनाभावे परस्य
कर्मकर्तृत्वे प्रवर्तनेनात्र वचमस्ति पाकयज्ञेषु स्वतोऽकर्तृत्वविधायकत्वात् वचनसमाख्यापि वास्ति
न तु स्मार्तानां वेदमूलत्वात् यद्वेदमूलं स्मार्तं कर्म तद्वेदसमाख्याया अन्यस्य कर्तृत्वं कल्प्यताम
वेदतः स्मृतयोऽभिमतवेदमूलाः अतोऽनुज्ञायते किं वेदमूलमिदं कर्म यद्वेदसमाख्ययाध्व
र्युः कर्त्ता कल्पयतं मंत्रलिङ्गविरोधापि परकर्तृत्वं कथं समानं प्रजाभव प्रजापतिष्ठानि पुनः कर्म
दं अमोहमस्मीत्यादिमानः पूषाशिवनमेत्यादयो वेवा हि मंत्रा आत्मलिङ्गत्ते च परकर्तृत्ववि
रोधात् तस्मात् पाकयज्ञेषु स्वयं यजमानस्यैव कर्तृत्वमिति सिद्धं अत्र करोति वासः मीपरिधत्ते
परिधास्ये इत्यनेन मंत्रेण ॐ परिधास्ये यशो धास्ये दीर्घायुत्वाय जरदष्टिरस्मि शतं च जीवामि श
रदः पुरू चीराय स्पोषमभिसंव्ययिष्ये परीधानं करिष्यामि परिधाय यशो धास्ये कीर्तिं धारयिष्यामि परिधा
नेन कीर्तिमे भविष्यतीत्यर्थः अपि च दीर्घायुत्वाय किं च जरदष्टिरस्मि जरद्धाहुकं अत्रानि
व्याप्नोतीति जरदष्टिः वृद्धो भवामीत्यर्थः किं च शतं शरदः शतं वर्षाणि जीवामि विं भूतः सुव
र्णाशोभनदीप्तिशीला रायस्पोषं रायस्पोषाय धनवृद्ध्यर्थं एतावद्भिः प्रयोजनैः अभिसंव्ययिष्ये
अभिसर्वतो भावेन सम्यक् व्ययिष्ये आचरणं करिष्यामि इत्युपसंहारः पुनः पुनरुक्ते अर्थादतोऽत्र
यार्थः रायस्पोषमिति सुयो भवतीति चतुर्थ्यर्थे द्वितीया संव्ययिष्ये इति व्येञ् संवरणे इत्य
स्य रूपं ततो द्वितीयवस्त्रेणोत्तरीयं कुर्यात् यशसा माद्यावापृथिवीति मंत्रेण ॐ यशसा माद्या ६

12

13

वा पृथिवीयशो द्यावृहस्पती यशो भगस्य मा विदद्यशो मा प्रतिपद्यतां । द्यावापृथिवी आकाशपृथिवी मा
मां आच्छादयेतामिति क्रियापदमध्याहर्तव्यं बोद्धव्यं केन यशसा किंच इन्द्र बृहस्पती यशसा आच्छादयेतां किंच य
शो मां अविंदत् प्राप्नोतु न केवलं यशः भगस्य सौभाग्यं च माविदत् किंच यशो मां प्रतिपद्यतां आ
गच्छतु पुनः पुनरविसिधानमादरार्थमिति शब्दार्थः अनेनान्तरीयवस्त्राच्छादनेन आकाशपृथिवी इन्द्र
बृहस्पती मां मां यशसा आच्छादयन्तु उत्तरोत्तरं यशः सौभाग्यं मम भवतु इत्याशासावाक्यार्थः अत्र व
स्त्रपरिधानानन्तरं परस्परं समञ्जनाभिमतिप्रेषण कन्यापिता एनौ वधूवरौ समंजेथामिति प्रत्याचष्टे कु
मार्यौ करोति ततः समञ्जन्तु विश्वेदेवाः समापो हृदयानि नौ समातरिश्वा सन्धाता समुदेष्ट्री दधातु
नाविति विश्वेदेवा नौ आवयोः हृदयानि हृदयं समञ्जन्तु सम्यगङ्क्तु अपि च पानीयानि समञ्जन्तु
नौ हृदयमनेन संबंधः पानीयेनोत्सर्गपूर्वकं दत्ता पाल्य वहृदयस्यागतं भवत्विभिप्रायः तथा मा
तरिश्वा आवयोः प्राणवायुः नौ आवां संदधातु संयोजयतु तथा धाता नौ आवां संदधातु उदे
ष्ट्री इच्छा कर्त्री देवता कामदेवः नौ आवां संदधातु आवयोः प्राणवायुः प्रजापति कामदेवश्च
आवां संयोजयन्तु इत्याशासावाक्यार्थः अत्र व्यवहिताश्च सूत्रेण व्यवहितेः सत्रपूर्वे दधातु क्रि
यासंबंधः हृदयानीति बहुवचने एकवचनं ज्ञातव्यं उदेष्ट्री दिशु इच्छायामित्यस्मात् तृन्पूर्वात्
तृचि के छांदसत्वात् इट् न भवति देवताभिप्रायेण स्त्रीत्वविवक्षायां ङीप् अत्र भवदेवोपाध्याय
लिखितमिदं करसंपुटं लिखेते यथा माता मंगलो व्यथितिलिप्रेन दक्षिणहस्ते न ता हृष
मेव कन्यायाः दक्षिणं हस्तं स्वहस्तोपरि निधाय फला क्षतान्हिरण्यं दत्वा उत्तरेणाच्छादयति
पुत्रवती नारीमंगलशब्दपूर्वकं कुशादिना हस्तद्वयं बध्नाति अथ गोत्रोच्चारणं द्विवचनात् नाम
गोत्रे समुच्चार्य संप्रदानस्य चात्मनः संप्रदेयप्रयतं तिकन्यायास्त्रिनुयोच्चारणं लिख्यते तत्र यथा
अमुकगोत्रस्यामुक ३ प्रवरस्यामुक शर्म्मणः प्रपौत्राय अमुकगोत्रस्यामुक ३ प्रवरस्यामुकश
र्म्मणः पौत्राय अमुकगोत्रस्यामुक ३ प्रवरस्यामुक शर्म्मणः पुत्राय अमुकगोत्रस्यामुक ३ प्रवर
स्यामुकशर्म्मणे वराय प्रयतपाणिः आशाम्प्रदाय इति वरपक्षे अमुकगोत्रस्यामुक ३ प्रवरस्याम
मुकशर्म्मणः प्रपौत्री अमुकगोत्रस्यामुक ३ प्रवरस्यामुकशर्म्मणः पुत्री प्रयतपाणिः शरणोऽग्रप
द्ये इति कन्यापक्षे एवमेव पुनर्वारत्रयमुच्चार्य ततः कन्यापिता कुशतिलजलान्यादा
य ॐ अद्येत्यादि अमुकगोत्र श्री अमुक देवशर्म्मा जिराजावच्छिन्न ज्योतिष्टोमयज्ञजन्य

विपटी ६

फलनतसुमफलप्राप्तिकामोऽमुकगोत्रामुकप्रवरायिमांकन्यांस्नातांयथाशक्त्यलंकृतां
गंधाद्यर्चितांप्रजापतिदैवताकाममुकनाम्नीकन्यांऽमुकगोत्रायामुकप्रवरायाऽमुकशर्म
स्वाध्यायिनेऽमुकसर्मणेवरायभार्यात्वेनतुभ्यमहंसंप्रददे इतिकुशेनतज्जलेनकन्याहस्तं
वरस्यहस्तेदद्यात् द्यौस्त्वाददात्वितिमंत्रेणप्रतिगृह्णीत अयंमंत्रोऽप्यन्यकार्यएवपठचनान्यपरो
वरस्यहस्तेदद्यात् द्यौस्त्वाददातुपृथिवीत्वाप्रतिगृह्णातु हारास्योपकारकः अदःपृथिवीत्वयथार
र्थः हेकन्यकेनत्वायपिताऽऽकाशाभिवत्युक्तादिहारास्योपकारकःत्वांप्रतिगृह्णामीतिवाक्यार्थः ततः
यथापृथिवीविशेषामाश्रयः तथानयातया अयमपि त्वांप्रति कामोदात्कामायादात्का
कोदादितिकामस्तुतिंपठेत् कात्यायनः ॐकोदात्कस्माअदात्कामोदात्कामायादात्
मोदाताकामःप्रतिगृहीताकामैतत्ते कोदात् दत्तवान्कस्मैअदात् नकोऽपरःकामोदादात्
कामायअप्रदात् यतःकामोदाताकामःप्रतिगृहीताअतोहेकामत्वाभिलाषमेनत्प
नोएतत्तेदेयंवस्तुकन्यादिकंतवभवति हेकामत्वेनदत्तंवयंभुंजामहे इतिक्रियापदमध्या
हार्य्यं अत्रकामशब्देनइच्छाभिधीयते यतःइच्छयामेवसत्त्याद्दीयते गृह्यतेचततः
इच्छेकदातिप्रतिगृह्णातीति यतःसेवदात्रीप्रतिग्रहीत्रीच अतस्तस्यायैवेनहतिकामस्तु
तिपूर्वकंकामस्यैवएतत्द्रव्यंवयमुपभुंजामः इतिवाक्यार्थःततःकन्यादानकर्मणः
प्रतिष्ठार्थंस्वर्णगोमिथुनंचदद्यादिरगादद्यात् इतरवरपक्षेऽमुकशर्मणेऽमुकवर्मणेऽमु
कगुप्तायामुकदासायेतिविशेषः अत्राचारादन्यापिधौतकादिनसुवर्णरजतताम्रपात्राणिच
ग्रामादिकन्यापितायथासंभवंददाति अन्येपिवाद्येयःयथासंभवंधौतकंप्रयच्छंति कें
लधौतकंमानेप्रयच्छंति अत्रदेशाचारतोव्यवस्था आचाराद्दपत्यारंचलग्रंथिकरणं
पित्रादत्तामादायगृहीत्वानिष्क्रामति पित्राजनकेनप्रतिसंकल्पदत्तांआदायप्रतिगृह्य
धिनाप्रतिगृह्यगृहीत्वाहस्तंधृत्वानिष्क्रामेतिगृहमध्यात् मंडपाद्यग्निसमीपंगात् यदैषिमनसे
न्यादिनामंत्रेण ॐयदैषिमनसादूरंदिशोनुपवमानोवाहिरण्यपर्णोवैकर्णःसत्वामन्मन
सांकरोत्विति हेकन्यकेत्वंयन्मनसादृदयेनदूरंदिशोगच्छसिपितृकुलतोवाहिर्भूतःकेनकु
त्रनीये इतिहृदयेनदूरंयासिसोत्कंठाभवसि इतियावत् ततःदिशःप्राच्यादिदिशःननु
दनंतरंपवमानोवायुपवमानस्थवापवनसमुच्चयार्थः वायुर्वान्यर्थः हिरण्यपर्णःहिर
ण्यपर्णोयस्यसहिरण्यपर्णःआदित्यः विपर्णोऽग्निः एतेपूर्वादिदिग्वायुःसपाग्नयः
वात्वामन्मनसांकरोतु मत्कृतहृदयांकुर्वन्त्विति अत्रकन्यकान्कण्ठानिहाग्निः स्वहद

पैकवाक्यत्वं तस्तनेवावयवार्थः तत्र तेन प्रथमा वा एकवचनं सुपां सुपो भवन्तीति एकवचनेव द्विवचने निकुर्वैरिति
शेषेति इत्यन्यथेन प्रथमपुरुषैकवचनेन द्विवचनं अत्रापि जन्यपत्तलक्षणं पिता पितामहो भ्राता सकु
ल्या जननी तथा कन्याप्रदः पूर्वनाशे प्रकृतिस्थः परः परः इति याज्ञवल्क्योक्त अन्येषामपि कन्यादाना 15
धिकारस्मरणात् अथैनौ समीक्षयति अथानेक्रमणानन्तरं एनौ वधूवरौ परस्परं समीक्षयेत् इति
प्रैषेण कन्यापिता समीक्षयति समीक्षणं कारयति तत्र समीक्षमाणो वरः अघोरचक्षुरित्यादीन्
मन्त्रान् पठति इति ॐ अघोरचक्षुरपतिघ्न्येधि शिवा पशुभ्यः सुमनाः सुवर्चाः वीरसूर्देवकामा स्योना
नो भव द्विपदे शं चतुष्पदे सोमः प्रथमो विविदे गन्धर्वो विविद उत्तरः तृतीयो अग्निष्टे
पतिस्तुरीयस्ते मनुष्यजाः सोमोऽददद्गन्धर्वाय गन्धर्वोऽददग्नये रयिं च पुत्रांश्चादादग्निर्मह्यमथो इमां
सा नः पूषा शिवतमामेरय ता न ऊरू उशती विहर यस्यामुशन्तः प्रहराम शेपं यस्यामु कामा बहवो
निविष्ट्यै हे कन्ये अपतिघ्नी एधि भवेत्यर्थः किंभूता त्वं अघोरचक्षुः अघोरं अभीषणं सौम्यं चक्षुः
पतिविषये यस्याः सा तथा किंच पशुभ्यः शिवा कल्याणकारिणी सुमनाः शोभनं समनुकूलं
यस्याः सा सुवर्चाः शोभनदीप्तिः वीरं वीर्यवन्तं सूते वीरसूः देवकामा देवं देवनं क्रीडनं कामयते
या सा देवकामा स्योना सुखिनी नोऽस्माकं द्विपदे मनुष्यपरिजने शं कल्याणकारिणी भवेति किं
या पदे शिवा पशुभ्यः इत्यादि सप्तभिर्विशेषणैर्वधूः तथा चतुष्पदेऽश्वादौ शं भवेति इत्यमाख्या
स कन्यास्तुतिमाह तत्र सोमः प्रथमो जन्मसमये एव विविदे लब्धवान् ततः तृतीयः पति
रग्निः पूर्वं स्त्रियः भुक्ताः सोमगन्धर्ववह्निभिः सोमः शौचं ददौ तासां गन्धर्वोऽस्य सुभां गिरिं पावकः
सर्वमेध्यत्वं मेध्या वै योषितो ह्यतः इत्यभिप्रायमेतत्तथा तुरीयश्चतुर्थः पतिर्मनुष्यजः म
नुष्याज्जातो ह्यमित्यर्थः तत्किमिदानीं चतुर्णामेवाहमित्याशङ्क्याह सोमः इमां गन्धर्वाय
अददत् दत्तवान् न केवलमिमां किंतु रयिं च धनमपि पुत्रांश्च अग्निर्मह्यं अददादिति संबन्धः सा
इयं नोऽस्मान् मेरयतु मां प्रेरयतु मा त्यजतु किंभूता पूषा वृद्धिकारिणी पुनः किंभूता शिवतमा
प्रति कल्याणी किंच यस्यां त्वयि प्रातः इच्छन्तो वयं शेपं इन्द्रियं प्रहराम पतियाम सा त्वं ऊरू
विहर प्रसारय किंभूता नोऽस्मान् उशती इच्छन्ती उ किंच यस्यां त्वयि बहवः कामा अभिलाषि
तानि निविष्टा निवेशिता प्रदक्षिणमग्निं पर्याणयेत् एके आचार्याः अग्नेः प्रदक्षिणं का
रयित्वा वासःपरिधानं समञ्जनं समीक्षणं च मन्यन्ते पश्चादग्रेस्तेजनीकटं वा दक्षिणपादेन

वि॰
प॰
टी॰
८

16

ब्रह्मणोपविशति समीक्षणानंतरं अग्निं प्रदक्षिणीकृत्य अग्नेः पश्चिमतः प्राङ्मुखं उपविशति दक्षिणतो
वधूं वरः कृत्वा दक्षिणपादेन तेन नीलं तृणं तूलिकां कटं वा तृणमयं मलं वा प्रत्यङ्मुखं उपवेशयेत् दीक्षि
तायाः तेन उल्लंघयत् चालित्वा उभयोः संस्कार्यत्वात् सवधूकः अथ यत्र गृह्यस्थालीपाकानां कर्मसु यत्रोत
विधानं तेनेमं यत्र आम्नातानि कर्मण्यभिहितानि स्थालीपाकान्यभियेयानि अनेन एतौ सर्वत्राश्वसे ...
अयं स्थालीपाकः गृह्यस्थालीपाकाले गृह्यस्थालीपाकानां कर्मक्रियानुष्ठानमिति यावत्
वा स्वस्थानेइति सूत्रशेषः तत्रहावाधानादि सर्वकर्मणां साधारणविधिः अथ यमिके कथयोच्यते २
तत्र गार्ह्यो वा वसथ्याधानादिषु सर्वकर्मसु यजमानएव कर्त्तान्य मंत्रित्विक् तस्याप्यनुक्तत्वात्
अथ यजमानः सुस्नातः सुप्रक्षालितपाणिपादः स्वाचांतः कर्मस्थानं भागान्यवरणादि प
ञ्चिपक्षोऽध्वासने प्रागग्रान् दर्भान् वा तीर्थं कुशान् दत्वा प्राङ्मुख उपविश्य आचम्य यत्नः शुद्धायां
भूमौ समप्रविंशत्यंगुलं मंडलं परिलिख्य तत्र परिसमूह्य त्रिभिर्दर्भैः पांसून् परास्य उपलिप्य
गोमयोदकेन स्रुवमूलेन दक्षिणमारभ्य प्रागग्रां रेखामुल्लिख्य प्रागग्रां उदक्संस्थां स्थंडिल
परिमाणां लिखित्वा पुनरुद्धृत्य अनामिकांगुष्ठाभ्यामुल्लिखितपांसूनादाय पांसून् दूरे
न्यस्य अग्निकाद्भिरभ्युक्ष्य अभिषिच्य अग्निमुपसमाधाय कर्मसाधनभूतं लौकिकं स्मार्तं २
आवाहयेत् पात्रेण संपूर्णेन वारिणा अनलेन जलं पूर्णं प्रशीतः प्रत्यङ्मुखो भवेत् श्रौत
वा आत्माभिमुखं स्थापयित्वा दक्षिणतो ब्रह्मासनमास्तीर्य अथ पवित्रप्रमाणमाह व्यासः कु
शौ तु पवित्रे द्विहस्तौ प्रादेशमात्रेण संयुतः मध्यमूलेकुशौ छित्वा प्रागग्रौ कौशे कुशान्यजेन् कु
शानि स्तीर्य चतुर्दिक्षु कुशप्रमाणमाह च्यवनः ब्रह्मासने कुशा दत्वा प्राक् मूलका
उपदेशनार्थं कुशप्राशनाय कुशद्वयं आज्यमनार्थं कुशामेकांछादनार्थं कुशत्रयं पूर्णा
तास्वजलपूर्णात्रयं कुशरत्नोस्थितः समार्जनार्थं कुशाश्चैतास्त्रयो रत्नमूलयोः अथ संमार्जि
नं कृत्वा प्रोक्षणपात्रे जलसेचनं अथ चतुर्दिक्षु कुशाविस्तीर्णप्रमाणमाह बृहस्पतिः कुशाः षोड
शास्तृणीयाच्चतुर्भागे सर्वतः अग्नेरीशानत्रितयाग्नि रेखायाः पुष्पमारणात् अथ उपयमनप्रमाण १४
माह शौनकः वेणीत्रयकुशास्तिस्रः वामहस्तसमास्थितः दक्षिणाजानुरधोपिदत्वोद्गवान
जानुतः अथ संपूर्णकुशपिंडिका कुशासंख्यामाह मार्कंडेयः अशीतिमकुशासंख्याकुशपि
डिकायां चैव सदा सर्वेषु सर्वयज्ञेषु अपि वेदः प्रशस्यते ततो ब्रह्मोपवेशनादिपर्युक्षणा
दिकर्म कुर्यात् तस्याग्नेर्दक्षिणास्यां दिशि ब्रह्मणो वरणादि पञ्चियदारुनिर्मितमासपीठ

॥ वारणं द्वादशांगुलदीर्घं चतुरंगुलविस्तारं चतुरंगुलखातं च मसृणं सव्यहस्ते कृत्वा दक्षिणहस्तेन पात्रस्योदकेन स्पर्शयित्वा ॥ ५

मालीयं कुशैः प्रागग्रैः स्तीर्त्वा तत्र च एतान् आस्तरणाभ्यां पूर्वसंपादितं कर्मसु नत्वं तत्रास्तरणं तत्र वै पंचा
शत्कुशानि मितं अथ परस्तरणं प्राङ्मुखमासीनं स्वयमुदक्स्रवकप्रासीनोनुलेपनपुष्पमाल्यवस्त्रा
लंकारादिभिः संपूज्य पात्रासादनं कुर्यात् तत्र समस्तं कर्मणो गोत्रमुकशर्मेन्तु ब्रह्मत्वं त्वं ब्रह्मा भवेति
ब्रह्मणोभावात्सुकृतवंन्मुपवेश्य प्रणीपत्रपदनिशेधः तद्यथा अग्नेरुत्तरतः प्रागग्रकुशेषु पात्राणि द्वंद्वं प्रयक
त्स्रपयित्वा परिस्तीर्य अग्निं वर्हिर्मुष्टिमात्रं ईशानादि ईशानान्तं प्रागग्रैर्वर्हिभिरुदकसंस्थं अग्नेः प
श्चिमे आसादनं कृत्वा अथ वहासाद्यपात्रं बर्हिः प्रथमार्थ्येर्यं प्रयोजनं तावत् पहारी नु द्वंद्वं प्रा च उदगग्राण्य
ग्नेरुत्तरतः पश्चात् आसाद्य तद्यथा पवित्रच्छेदनानि त्रीणि कुशान्तरणानि पवित्रे साग्रे अनन्तर्गर्भे कु
शतरुणे प्रोक्षणीपात्रं वारणं द्वादशांगुलदीर्घं करतलसम्मितखातं पद्मपत्राकृतिकमलमुकु
लाकृतिं वा आज्यस्थाली तैजसी मृण्मयी वा द्वादशांगुलविस्तारा प्रादेशोन्नता एवं चरुस्थाली सं
मार्जनकुशास्त्रयः उपयमनकुशास्त्रिप्रभृतयः समिधस्तिस्रः पालाश्यः प्रादेशमात्र्यः स्रु
वः खादिरो हस्तमात्रः अंगुष्ठपर्वमात्रखातपरिणाहवर्तुलः उत्करः आज्यं गव्यं चरुश्च व्रीहि
तंडुलाः षट्पंचाशदधिकमुष्टिशतद्वयपरिमितं पराङ्मुखं चतुर्भोक्तुः पूर्णपात्रं परिमितंतंडुलैः
पूर्णं पात्रं दक्षिणा वरो वा यथाशक्ति हिरण्यादि द्रव्यं पवित्रे एतत्कृत्वा प्रथ
मत्रिभिः कुशानन्तरणैः अनन्तः प्रादेशमात्रं विहाय द्वे कुशानन्तरणे प्रक्षिप्य प्रोक्षणीसुसंस्कार
प्रोक्षणीपात्रं प्रणीतासन्निधौ निधाय तत्पात्रान्तरेण हस्तेन वा प्रणीतोदकमासिच्य पवि
त्राभ्यामुत्पूय पवित्रे प्रोक्षणीपुनि धाय दक्षिणेन प्रोक्षणीपात्रं निधाय सुन्याप्य सव्ये कृत्वा
तदुदकं दक्षिणेनोद्धृत्य प्रणीतोदकेन प्रोक्ष्य अथ चरुप्रोक्षण आदधाति प्रयोजनं वेति।
आज्यपात्रं स्थाल्यादीनि पूर्णपात्रपर्यन्तानि प्रोक्षणीभिरद्भिरासादनक्रमेणैकैकशः प्रोक्ष्य संचरे
प्रोक्षणी निधानं प्रणीताग्न्योर्मध्ये असंचरन् उच्यते पवित्रमादाय तिरूपात्र्यं आसादितं
माज्यं आज्यस्थाल्यां पश्चादग्रे विहितायामाज्यं प्रक्षिप्य चरुश्चेत् चरुस्थाल्यां प्रणीतोदक
मासिच्य आसादितानतंडुलान् प्रक्षिप्य अधिश्रयणं तत्राज्यं ब्रह्माधिश्रयति तदुत्तरतः
स्वयं चरुमेवं युगपदग्रा चारोपपर्यग्निकुर्यात् ज्वलदुल्मुकं प्रदक्षिणं आज्यचर्वोः समं

वि॰ प॰ टी॰ ८

18

आज्यमध्येन स्रुनेचरौ स्रुवं प्रज्ञाप्य दक्षिणेन स्रुवमादाय प्राच्यमध्येसुवमग्नौ तापयित्वा सव्ये
पाणौ कृत्वा दक्षिणेन संमार्ज्याग्रे मूलतो ग्रपर्यन्तं संमज्य मूलेरथमारभ्य अधस्तात्मूल
पर्यन्तं अभ्युक्ष्य प्रणीतोदकेनाभिषिच्य पुनः पूर्ववत्प्रतप्य चरोः पूर्वेणानीत्वा अग्नेरुत्तरतः
स्थापयेत् - त्वा चरुमुत्थाप्य पश्चिमतो नीत्वा आज्यस्योत्तरतः स्थापयित्वा आज्यमग्नेः प
श्चादानीय चरुं चानीय आज्यस्योत्तरतो निधाय एवं त्रिचतुरादीन्पात्रान पिहवीष्यु
द्वासयेद्यधिस्तनान्तु पूर्वेणो द्वासिना पश्चिमतोऽह विश्व उद्वासनयत्नमिति याज्ञिकसंप्र
दायात् उत्पूय पूर्ववत्पवित्राभ्यां अग्रे वेत्यग्रचलाक्याज्यं प्रोक्षणीश्च पूर्ववत्पवित्राभ्यामुत्पूय
उपयमनकुशानादाय दक्षिणपाणिना गृहीत्वा सव्येन धाय समिधोऽभ्याधाय तिष्ठन्समिधः प्रक्षि
प्य पर्युक्ष्य प्रोक्षणपुदकेन सव्येन सपवित्रेण दक्षिणेन चलुकं गृहीत्वा अग्निमीशानादि उत्तरा
ग्रपरिषिच्य जानुकृत्यात् आघारादीन् ब्राह्मणार्थे दक्षिणजान्वाच्य स्रुवेणाज्येन मनसा प्रजा
पतये स्वाहा इदं प्रजापतये उत्तरत प्रागग्रमिति संततं दीर्घं इन्द्राय स्वाहा इदमिन्द्राय दक्षि
णतः प्राचं संततं दीर्घं अग्नये स्वाहा इदमग्नये पवित्रप्रणीतासु निधाय अग्नेरुत्तरतः पूर्वार्द्धे चतु
ल सोमाय स्वाहा इदं सोमाय दक्षिणपूर्वार्द्धे चतुल संस्रुवधारणार्थं पात्रं प्रणीतायामन
धोनिदध्यात् पवित्रप्रतिपत्तिः प्रणीताविमोकः देवतागातु निद ... इति वर्हि होमः एष
एवविधियत्र क्वचिद्धोमः एषः परिसमूहनादि पर्युक्षणपर्यन्तो विधिरेव समन्त्राः क्वय
त्र क्वचन लौकिके स्मार्ते वाग्नौ होमस्तत्रैवं दृष्टव्यं अन्वारब्धस्याघारावाज्यभागौ महाव्या
हृतयः सर्वप्रायश्चित्तं प्राजापत्यं स्विष्टकृच्चैकानि नित्यं सर्वत्र अत्रैव वाह्निके होमप्र
संगेन सर्वकर्मसाधारणीयं परिभाषा कृतोन्याचार्य्यैः न त्वया ब्राह्मणा दक्षिणे वाह्
ला॰ दक्षिहस्तेन अन्वारब्ध कर्त्तरि आघारसंज्ञके आघाराहुती यथा मनसा प्रजापतये स्वा
हा इदं प्रजापतये इति मनसा त्यागमिति इन्द्राय स्वाहा इदमिन्द्राय आज्यभागौ आज्यभा
गसंज्ञको होमो यथा अग्नये स्वाहा इदमग्नये सोमाय स्वाहा इदं सोमाय महाव्याहृतयः

२

भूतयास्मित्वः यथा ॐ भूः स्वाहा इदमग्नये इदं भूर्वा इति त्यागः तथैव च भुवः स्वाहा इदं भुवः इति 19
वा स्वः स्वाहा इदᳪ सूर्याय इदं स्वः इति वा सर्वप्रायश्चित्तं सर्वप्रायश्चित्तसंज्ञको पंचाहुतयः यथा
ॐ त्वन्नो अग्ने वरुणस्य विद्वान् देवस्य हेडो अव यासिसीष्ठाः यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषा
ᳪसि प्रमुमुग्ध्यस्मत् स्वाहा अस्यार्थः हे अग्ने वरुणस्य देवस्य हेडः क्रोधः तस्मिन् कर्मणि वैगुण्यजनितं त्वया
निस्तीष्ठाः अपनय किंभूतः त्वं नोऽस्माकं विद्वान् त्वमेवास्माकं कर्मसाद्गुण्येनास्मान् जाना
ध४ सीत्यर्थः न केवलं वरुणस्य क्रोधमपनयास्मत् अस्मत्तो द्वेषांसि दौर्भाग्यानि प्रमुमुग्धि प्रमोचय किं
भूतानि विश्वानि त्वं किंभूतः यजिष्ठः यागे शान्तिप्राये उत्तमः पुनः किंभूतः शोशुचानः उत्तरोत्तरं दी
प्यमानः हे अग्ने त्वमस्मान् जानासि अतोऽस्माकमस्मिन् कर्मणि प्रमादादि जनितं वैगुण्यपकृतं
तं वरुणस्य क्रोधमपनयास्माकं दौर्भाग्यानि च मोचयेति प्रार्थनावाक्यार्थः हेड इति पदः हेड अनाद
र इत्यस्य प्रयोगः शोशुचानः द्वितीयैकवचनं ॐ स त्वन्नो अग्नेऽवमो भवोती नेदिष्ठो अस्या उष
सो व्युष्टौ अव यक्ष्व नो वरुणᳪ रराणो वीहि मृडीकᳪ सुहवो न एधि स्वाहा अस्यार्थः हे अ
ग्ने स त्वं नोऽस्माकमवमो व्युष्टौ समाधावस्मिन्नेव दिवस इत्यर्थः न केवलमस्मानधिग्रा
गच्छ किंभूतः सुहवः सुखाह्वानः आगत्य च वरुणमवयक्ष्व पृथक् कुरु किं कुर्वन् नोऽस्माकमर
लीकं रराणः अस्मभ्यं समधिसुखकरं हविर्दधानः स्वयं च वीहि तं देवं भक्षय वरुणं पूजय
त्वं समभक्षय प्रार्थनावाक्यार्थः अवम इति अरुदान्तस्य अवतमः तस्य तकारलोपः
८ ऊती सः अवरक्षा इत्यस्य ऊती पूनीति निपातनात् ऊती इति रूपं तत्र तृतीयैकवचने सुलु
गादिना पूर्वसवर्णदीर्घः ऊती इति रूपं रराणः इत्यस्य अवकुलकिणान रूपं ॐ अया
श्चाग्नेस्यनभिशस्तिपाश्च सत्यमित्त्वमया असि अया नो यज्ञं वहास्ययानो धेहि भेषज
ᳪ स्वाहा हे अग्ने त्वमयाश्च असि प्राणिनामितवदिर्धिरपि असि अपरमनभिशस्तिपा
श्चासि विद्यमानाभिशस्तिर्याचनया यस्य पुरुषस्य सोऽनभिशस्तिस्तमनभिपासि रक्ष
सीत्यनभिशस्तिपाः त्वं मयसत्यमर्थः यस्त्वां रक्षणार्थं न याचते तस्यापि त्वं स्वाहा याइद्र
कोऽभवसीति तदित्थंभूतस्त्वमयाः गत्वा नोऽस्माकं यज्ञं च हव्यविधि विरे हुतं देवान् प्रापय

वि० प० टी० ९

अ०

किंच त्वं सत्यमित्यमेव प्रायश्चित्तज्ञानासि जरातः संसारस्य निस्तारकोपायं जानासीत्यर्थः 20
अतः कारणात् पवित्वमयाग्रागच्छ आगत्य चनोस्माकं भेषजं धेहि अस्मिन्निस्तारको
पायमौषधं परिकल्पय येन त्वमपि लोके शुभावह विशाची ष्य: प्राब्दोत्र कारान्तस्तथापि
बुदसि सकारान्तः सत्यमिति शब्दोत्रावधारणार्थे: अयानोयज्ञं वहस्ययानोधेहि भे
षजमिति क्रियापदद्वयमिति व्याख्येन विद्यातनार्थः अयाइति इणगतौ इत्यस्य "पदस्मे पदवि
लुङ् मध्यमपुरुषैकवचने सिप् इतस्य लोपः धातोर्गुणः लोपेइत्यादि विस्पष्टाण नीकार लोपः"
गमः आङ् पूर्वस्य गुणस्याकारो दीर्घः सति वर्णव्यत्ययेन ह्रस्वत्वं अयाइति सर्वगत्यर्थः इति
कृत्वाएतज्ज्ञानातीत्यासुन् प्रत्यये त्वप डाग्निशलवरणसहस्वयज्ञियाः पापाचिन्तनामहान्तस्तेभि
र्नीय यसविता नयिस्मुर्विश्वेमु चं चलमरुतः स्वर्का रुवरुलयनेनेवशमपापाचिन्तनाविस्तीर्णा अपि
चयसृहस्वपारुपाहानमितिवरुत्वापलहणार्थे किंभूतायज्ञियाः यज्ञेनधाभूर्नेनुष्ठानजनिताःच
पा० पिचकिंभूताः महान्तोव्यापकाः एभिर्लेशोनोस्मान्यह्यानीमुविन्तनकेवलमुतविस्मुर्विश्वेदेवा
मरुतोपचय: स्वर्का: सुष्टाचिन्तामुचन्तुमञ्चान्कुर्वन्तु अयंवाक्यार्थः अस्मिन्यज्ञकर्मणिया
निचिन्तुमाहाविहृतान्यताभूतानुष्ठानजनितापापानिद्वःवरुनुतगुणयोगात्पापाणस्द
विधेयानितेःपापाःसवित्राद्यादेवाःअनयाप्राकृत्यास्मान्मुक्तान्कुर्वन्तु नेमिरितितच्छन्दस
नत्वेयावहुवचनेयकुलच्छन्दसीत्यपारिशानिषेधवहुवचनत्वादित्येत ॐउदुत्तमवरुणपाशमस्म त्वा
दवाधमंविमध्यमश्रथायअथावयमादित्यव्रतेनागसोअदितयेस्यामा वरुणः उदुत्तमं
पाशमस्मदुत्कृत्तांश्रसमवर्वस्मत्कुरु अथमंअथायकिंचमध्यमंपाशमवश्रथायअथैवकृते
आदित्यादितेःपुत्रवरुणव्रतेब्रह्मचर्यव्रतेनवानागसः अनपराधाःअदीनतायैसामादीना
भवेत्यर्थः प्रजापत्यप्रजापतिर्देवताकाहोमः यथा प्रजापतयेस्वाहा इदंप्रजापतये
स्विष्टकृच्च स्विष्टकृद्धोमस्य अग्नयेस्विष्टकृतेस्वाहा इदमग्नयेस्विष्टकृते चका
रःसर्वसमुच्चयार्थः एतन्नित्यं सर्वत्रपतद्दाघारावाहि स्विष्टकृद्धमा सर्वत्र सर्वेषुहोमात्म
केषुकर्मसुनित्य यत्रहोमाभावस्तत्रनास्ति यथामलोदारोहणलांगलयोजनायसत्राह्न
णभोजनेषुअनोविहितस्यास्विष्टकृद्धोमस्याकर्मविशेषस्यानान्तरमाह प्राक्स्वाहाग्राहुति १

थः शाकपूर्वस्त्विष्टकृत्प्रयोगो भवति चेद्यदि आज्यसंस्काराद्यन्यापि चरुप्रभृति हविर्भवति केवलाज्य

यागे तदाकृतिशेषं भवति सर्वप्रायश्चित्तं प्राजापत्यान्तरमेतत्तदावापस्थानं विवाहे सर्वप्रायश्चित्तं

त्वेवोत्तमेऽष्टकृत्याः प्रायश्चित्तमिति [illegible] आकृतिपञ्चकं प्राजापत्यं प्राजापत्याकृति इति सर्वप्राय

श्चित्तं प्राजापत्यं [illegible] सर्वप्रायश्चित्तप्राजापत्ययोरन्तरे सर्वप्रायश्चित्तप्राजापत्यान्तरे एतद्

आवापस्थानं कस्मिन्कर्मणि विवाहे आवापस्थानमावापः अन्यत्र विहितस्य होमजपादेः कर्मणः

कर्मान्तरे प्रक्षेपः आवापस्य आगन्तुकत्वेन [illegible] तन्निवृत्त्यर्थः तमेवावापमा

ह राष्ट्रभृत इच्छन् विवाहे वैवाहिके होमकर्मणि राष्ट्रभृत्संज्ञकाः आहुतीः आवाह

येदित्यर्थमाह जयाभ्यातानांश्च जयाभ्यातानानांश्च जयाभ्यातानान्। तानु जयाभ्यातानांश्च आवाहयेत्

नो किं कुर्वन् इच्छन् राष्ट्रभृज्जयाभ्यातानहोमफलं कामयमानः किं प्रमाणमिति चेत् जानन् येन

कर्मणेर्त्सेदितिवचनात् येनकर्मणा [illegible] कर्मण्यत्र [illegible] इति वचनात्

प्रतीतिरित्यर्थः तत्र राष्ट्रभृतो यथा अथ जयाभ्यातानाः ऋताषाड् ऋतधामाग्निर्गन्धर्व इत्यादिकाः

द्वादश मन्त्राः राष्ट्रभृत्संज्ञकाः ॐ ऋताषाड् ऋतधामाग्निर्गन्धर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा

स्वाहा योऽग्निर्गन्धर्वः गन्धर्वरूपस्तस्मै अग्नये स्वाहा दत्ताहुतिः [illegible] वषट् [illegible] इत्यर्थः

किंभूतोऽग्निः ऋताषाट् ऋतं सत्यं सहते इति ऋताषाट् सत्येन सहत इत्यर्थः पुनः किंभूतः

ऋतधामा सत्यं धाम स्थानं यस्य स ऋतधामा किमर्थं तस्मै स्वाहा क्रियते इत्याह स नः अस्मा

कं इदं ब्रह्म ज्ञानं क्षत्रं वीर्यं च रक्षतु गन्धर्वरूपाग्नये सत्यसहिष्णवे सत्यस्थानाय अस्माभिरिद

माज्यं दत्तं स अस्माकं ज्ञानं वीर्यं च रक्षतु [illegible] वाक्यार्थः ॐ ऋताषाड् ऋतधामाग्निर्गन्धर्व

स्तस्यौषधयोऽप्सरसो मुदो नाम ताभ्यः स्वाहा योऽयं ऋताषाड् ऋतधामाऽग्निर्गन्धर्व इत्युक्तं

तस्याग्नेर्गन्धर्वस्य अप्सरसः ओषधयो [illegible] गन्धर्वाणामप्सरसो भवन्ति किंभूता मुदो नाम मुदो

नाम इत्यर्थः [illegible] मोदन इति मुदः ताभ्यः ओषधिभ्यः स्वाहा सुहुतं भवतु अग्नेर्गन्धर्व

स्याप्सरोभ्यो मुदो नाम ओषधीभ्यः अस्माभिरिदमाज्यं दत्तं अस्माकं ज्ञानं वीर्यं च रक्षन्त्विति

मंत्रवाक्यार्थः ॐ संहितो विश्वसामा सूर्यो गन्धर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा

21

यः सूर्यो गंधर्वः किंभूतः संहितः दिवसं रात्रिं च संदधातीति संहितः पुनः किंभूतः विश्व
सामा सर्वसामवेदमयः अपरं सर्वं समानं ॐ संहितो विश्वसामा सूर्यो गंधर्वस्तस्य
मरीचयोऽप्सरस आयुवो नाम ताभ्यः स्वाहा। तस्य सूर्यस्याप्सरसो मरीचयो याः प्सरसः
किंभूता आयुवो नाम आयुवंति आयांति जगंतीन्यायुवः आयुवो नाम स्पृश्यत्वं यः अ
परं सर्वं समानं ॐ सुषुम्णः सूर्यरश्मिश्चंद्रमा गंधर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वा
हा वाट् यश्चंद्रमा गंधर्वः किंभूतः सूर्यरश्मिः सुषुम्णो नाम अपरं सर्वं समानं।
ॐ सुषुम्णः सूर्यरश्मिश्चंद्रमा गंधर्वस्तस्य नक्षत्राण्यप्सरसो भेकुरयो नाम ताभ्यः स्वाहा। तस्य चंद्रमसो
अप्सरसा नक्षत्राणि किंभूतानि भेकुरयो नाम अपरं सर्वं समानं ॐ इषिरो विश्वव्यचा वातो गंधर्वः स न इ
दं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् यो वातो गंधर्वः किंभूतः इषिरः गमनस्वभावः पुनः किंभूतः विश्वव्यचाः
सर्वगः अपरं सर्वं समानं ॐ इषिरो विश्वव्यचा वातो गंधर्वस्तस्यापो अप्सरस ऊर्जो नाम ताभ्यः स्वाहा॥
तस्य वातस्य गंधर्वस्याप्सरस आपो जलानि किंभूता ऊर्जो नाम ऊर्जयंतीति नामस्य यासां अपरं सर्वं समानं ॐ
भुज्युः सुपर्णो यज्ञो गंधर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् यो यज्ञो गंधर्वः किंभूतः भुज्युः सर्वा
णि भूतानि भुनक्ति पालयतीति भुज्युः पुनः किंभूतः सुपर्णः शोभनगतिरिति यावत् अपरं सर्वं समानं ॐ
भुज्युः सुपर्णो यज्ञो गंधर्वस्तस्य दक्षिणा अप्सरसः स्तावा नाम ताभ्यः स्वाहा। तस्य यज्ञस्य गंधर्वस्याप्सरसो
दक्षिणाः किंभूताः स्तावा नाम दक्षिणा दत्ता यायजूकं स्ताव्यो भवतीति स्तावाः अपरं सर्वं समानं ॐ प्रजापति
र्विश्वकर्मा मनो गंधर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् यो विश्वकर्मा मनो गंधर्वः किंभूतः प्रजा
पतिः प्रजानां पतिः पुनः किंभूतः विश्वकर्मा विश्वं कर्म यस्य सः तेषां पारो विश्वस्य कर्मकरणात् अपरं सर्वं
समानं ॐ प्रजापतिर्विश्वकर्मा मनो गंधर्वस्तस्य ऋक्सामान्यप्सरस एष्टयो नाम ताभ्यः स्वाहा
तस्य मनो गंधर्वस्याप्सरसः ऋक्सामानि ऋक् च सामानि चेति ऋक्सामानि किंभूतानि ए
ष्टयो नाम आयष्टिरेष्टिः अनिशायिनेच्छा तयाच पुत्रादीनामप्युक्ते प्रज्ञादिः संपद्यते इत्याभि
प्रायः अपरं सर्वं समानं ॐ चित्तं च चित्तिश्चाकूतिश्च विज्ञातं च विज्ञानं च मनश्च शक्वरीश्च दर्शश्च पौर्णमासं च बृहच्च
रथंतरं च प्रजापतिर्जयानिंद्राय वृष्णे प्रायच्छदुग्रः पृतनाजयेषु तस्मै विशः समनमंत सर्वाः स उग्रः स इ हव्यो बभू २२

चोदितस्तत्र चित्तं चेत्येवमादीनां चतुर्थ्यन्तानां केचिदिच्छन्ति तदसंप्राप्तः कुतन स्वतानि देवतापदानि किं तु मंत्रात्म
यथाश्रुता एव प्रयुज्यंते चित्तं च चित्तिश्चेत्येवं पठितं प्रजापतिर्जयं दद्यादित्याम्नायायां जयोत्तो भविष्यति सेवात्रापि मंत्रं च
कारः समुचितः चित्तं ज्ञानं तत्र स्वाहाकारं दद्यादित्याम्नायायां कार्यः चित्तिश्च तां परिहरः आकूतं चाभिमुखं आकू
तिश्च आत्मनो धर्मविशेषोऽनेन तु विज्ञानं च चित्तिस्त्वज्ञानं विज्ञानं विज्ञातिश्च विज्ञानार्थं मनश्च श्रुति
दृशः करी स्युछदः शब्दः अमाना मनिश्च निपुं वक्तानिपुं चाभ्यां विहृदयं तद्वदिनिवर्ति पूर्णत्वयो वक्तनिवर्ति
पुनःकारस्वरेपक्ष शंकरी दर्शश्च प्रसिद्धः पौर्णमासं च प्रसिद्धं बृहद्रथंतरे सामविशेषः रथंतरं च सामविशेषः वा
क्यार्थस्य प्रथममंत्रोऽप्युक्त एव सर्वेषामेव ओं प्रजापतिर्जयानिन्द्राय वृष्णे प्रायच्छदुग्रः पृतनाजयेषु तस्मै
विशः समनमंत सर्वाः समनमंत स उग्रः स हि हव्यो बभूव स्वाहा प्रजापतिः इन्द्राय जयान् प्रायच्छत् प्रायच्छत् दत्त
वान् कथंभूताय इन्द्राय वृष्णे सेनानीत्वे प्रजापतिः किंभूतः पृतनाजयेषु उग्रः विपक्षसेनाविजये उद्ग्रयते
जोमिः आविष्कृते वृत्रवज्ञतस्मै प्रजापतिर्यं च दत्तवान् कथंभूतम् यतः कारणात् तस्मै प्रजापतये सर्वा विशः
प्रजाः समनमंत सन्नताः सम्यक् प्रणामं कृतवत्यः सयतः प्रजापतिस्तु ग्रावभूव सर्वेनेनोभिभाव्यो बभू
वा पतनाः सत हव्यो बभूव हव्याह्वा हवनभूवः प्रजापतिः स च विपक्षस्य विजयी लोकस्य कारणी
य सर्वैनेनाभिभाव्यो हव्यः हव्यः अत इन्द्राय जयप्रदत्तवानिति प्रजापतिर्ब्रूजिवाक्यार्थः इन्द्रस्य तु
त्वाज्याहुतिदानेन तत्तुष्टोऽस्मभ्यं जयं दद्यादित्यभिप्रायः ओं अग्निर्भूतानामधिपतिः समावत्विन्द्रो ज्येष्ठा
नां यमः पृथिव्या वायुरन्तरिक्षस्य सूर्यो दिवोधिपतिश्चन्द्रमा नक्षत्राणां बृहस्पतिर्ब्रह्मणो मित्रः स
त्यानां वरुणोऽपाꣳ समुद्रः स्रोत्यानामधिपतिस्तन्मावतु सोम ओषधीनाꣳ सविता प्रसवा
नाꣳ रुद्रः पशूनां त्वष्टा रूपाणां विष्णुः पर्वतानां मरुतो गणानामधिपतयस्ते मावन्तु पितरः पि
तामहाः परेवरे ततास्ततामहाः इह मावत्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेऽस्यामाशिष्यस्यां पुरोधा
यामस्मिन्कर्मण्यस्यां देवहूत्याꣳ स्वाहा सूत्रं अभ्यातानान् सत्काश्यतेऽष्टादशाभ्यासाः
सर्वत्रानुषजति अग्निर्भूतानामित्यादिषु पितरः पितामहा इत्यंतेष्वष्टादशसु मंत्रेषु प्रतिमंत्रं
मंत्रं यथालिंगं पाठं वचनसमविलिप्ता दिदेवहूत्याꣳ स्वाहेत्यंतं वाक्यैकदेशमनुषजति
